Roll No. ..........................

Total No. of Pages : 4

Total No. of Questions : 4

# पूर्वमध्यमा द्वितीयखण्ड

**विषय कोड : 602**

## संस्कृत भाषापरिचयः

### द्वितीय प्रश्नपत्र

**समय : 3 घण्टे** **पूर्णांक : 100**

**निर्देशा :— सर्वे** प्रश्नाः समाधेयाः।

1. उचितं विकल्पं चिनुत — 10×2=20

(*i*) सन्धिभेदाः कति ?

(1) त्रयः

(2) चत्वारः

(3) पञ्च

(4) षड्

(*ii*) "अदेङ्गुणः" करोति —

(1) गुणसंज्ञा

(2) इत्संज्ञा

(3) लोपसंज्ञा

(4) वृद्धिसंज्ञा

(*iii*) धातवः कतिविधाः ?

(1) त्रिविधाः

(2) द्विधा

(3) एकधा

(4) चतुर्धा

(*iv*) हेतुहेतुमद्भावे लकार: भवति –

(1) लोट्

(2) लङ्

(3) लृङ्

(4) लुङ्

(*v*) साधकतमं भवति –

(1) करणं

(2) कर्म

(3) अधिकरणं

(4) सम्प्रदानम्

(*vi*) 'परित:' योग भवति –

(1) तृतीया

(2) प्रथमा

(3) द्वितीया

(4) चतुर्थी

(*vii*) त्रिषु लिंगेषु समानं भवति –

(1) सर्वनाम

(2) उपसर्ग:

(3) अव्ययम्

(4) कृदन्त:

(*viii*) भारतीयभाषाणां जननी का :

(1) हिंदी

(2) संस्कृतम्

(3) लैटिन

(4) अवेस्ता

(*ix*) ''हस्त'' इत्यस्मात् तद्भवशब्द –

(1) हाथी

(2) हाथ

(3) हन्त

(4) हाव

(*x*) ''फादर'' इत्यस्य मूलम् अस्ति –

(1) पित्

(2) पात्रं

(3) पत्रम्

(4) अन्यम्

2. लघूत्तरीया: प्रश्ना: – 10×3=30

(*i*) सवर्णसंज्ञा-धातुसंज्ञाविधायकं सूत्रम् अर्थसहितं लिखत।

(*ii*) सूत्रनिर्देशपुरस्सरं ''हरये'' इत्यत्र विग्रहं प्रदर्श्यताम्।

(*iii*) ''उपेन्द्र:'' इत्यत्र विग्रहकृत्वा विधिसूत्रं लिखत।

(*iv*) तिङ्प्रत्यया: लेख्या:।

(*v*) सुप् प्रत्यया: लिख्यन्ताम्।

(*vi*) कालानुसारं लकारविभाजनं वर्णयत।

(*vii*) कतिविध: आधार: इति विलिख्य अधिकरणसंज्ञाविधायकं सूत्रं लिखत।

(*viii*) पञ्च अव्ययपदानि योजयित्वा वाक्यानि लिखन्तु।

(*ix*) पञ्चतद्धितप्रत्यया: सोदाहरणं लेख्या:।

(*x*) तद्भव-तत्सम शब्दयो: अष्ट उदाहरणानि लिखत।

3. उत्तरं लिखत (केचन **पञ्च**) – 5×4=20

(i) नदीशः मघ्वरिः इत्यनयोः विग्रहं प्रदर्श्य सन्धिविधायकसूत्रं लिखत।

(ii) अकर्मक-सकर्मक क्रिययोः **चत्वारि** उदाहरणानि लेख्यानि।

(iii) "क्तवतु" प्रत्ययस्य पठधातोः त्रिषुलिंगेषु प्रथमाविभक्तेः सर्वाणि रूपाणि लिखन्तु।

(iv) सप्तविभक्तीनां कारकनामानि लिखत।

(v) पञ्चकृदन्तप्रत्यया: सोदाहरणं प्रदर्शनीया:।

(vi) युष्मद् शब्दस्य सर्वविभक्तिषु रूपाणि लिखत।

4. दीर्घोत्तरीयाः प्रश्नाः (केचन **पञ्च**) – 5×6=30

(i) "दुह्याच०" इति षोडश द्विकर्मकधातूनां नामानि लेख्यानि।

(ii) सूत्र-अर्थ-उदाहरणसहिता चतुर्थी विभक्तिः लेख्या।

(iii) "अस्मद्" शब्दस्य सर्वविभक्तिषु रूपाणि लेख्यानि।

(iv) उदाहरणसहितं वाच्यपरिवर्तनभेदान् वर्णयत।

(v) यथा, यदा, नूनम्, च, सायम् – एतानि अव्ययानि योजयित्वा वाक्यनिर्माणं प्रदर्शयत।

(vi) रामोऽयम्, श्रीशः, नरेन्द्रः, नायकः – एतेषां विग्रहं प्रदर्श्य सन्धिविधायकसूत्रं लिखत।